Substance :—Character, Maithilī. Nepalī paper. Lines, 10 on a page. Letters, 44 in a line. Folia, 5. $12\frac{1}{4} \times 4\frac{1}{2}$ inches. Appearance, old. Verse. Complete. Incorrect. Date, Śaka 1770. Slightly damaged. Place of deposit, Pandit Dharmadatta Miśra, Babhanagama, P. O. Supaul, Bhagalpur. Worm eaten.

Beginning, End, Colophon, विषयः—Same.

(E)—वर्षारिष्टम् ॥ Varṣāriṣṭam.

Substance :—Character, Maithilī. Yellow paper. Lines, 9 on a page. Letters, 36 in a line. Folia, 7. 11×4 inches. Appearance, old. Verse. Complete. Incorrect. Date, Śaka 1767. Place of deposit, Pandit Ghanaśyāma Jhā, Babhangama, P. O. Supaul, Bhagalpur.

Beginning, End, Colophon, विषयः—Same.

(F)— वर्षारिष्टाध्यायः ॥ Varṣāriṣṭādhyāyaḥ.

Substance:—Character, Maithilī. Nepalī paper. Lines, 14 on a page. Letters, 54 in a line. Folia, 4. 11×4 inches. Appearance, old. Verse. Complete. Incorrect. Date, Śaka 1772. Place of deposit, Babu Ṭhiṭhra Jhā, Babhangama, P. O. Supaul, Bhagalpur. Worn out. Slightly damaged.

Beginning, End, Colophon, विषय —Same.

(G)—वर्षारिष्टम् ॥ Varṣāriṣṭam.

Substance :—Character, Maithilī. Brown paper. Lines, 8 on a page. Letters, 36 in a line. Folia, 8. 12×4, inches.

Appearance, fresh. Verse. Complete. Incorrect. Date, Śaka 1790. Place of deposit, Pandit Śrīnandana Miśra, Kanhauli, P. O. Sakri, Darbhanga, A hand-book of Jyotiś-Śāstra, dealing with grahavichāra. Anonymous.

Beginning, End, Colophon. विषयः—Same.

No. 333. वलनटीका by नीलाम्बरझा ॥ Valanaṭīkā.

Substance:—Character, Maithilī. White paper. Lines, 10 on a page. Letters, 67 in a line. Folia, 51. 14×4½ inches. Appearance, fair. Verse. Complete. Correct. Date ?. Place of deposit, Pandit Sītārāma Pāthaka, Karnpur, P. O. Sukpur, Bhagalpur. A commentary on Valana of Golādhyāya by Nīlāmbara Jhā.

Beginning — श्री विघ्नेशाय नमः ॥
उमेशं रमेशं गणेशं दिनेशं
प्रणम्यातिरम्या सुगम्या च टीका ।
मया तन्यते वालने भास्करीये
बुधानां विनोदाय नीलाम्बरेण ॥ १ ॥

अथोपरागपरागतपरिलेखाद्यु पयुक्तवलनसाधनं सवासनं विवक्षुस्तत्र तावदायनवलनसाधनार्थं तत्परमस्थानं तदभावस्थानञ्च दर्शयति ।

तुलाजाद्योर्हि संपाते विषुवत्क्रान्तिवृत्तयोः ।
स्यातां यामोत्तरे भिन्ने परक्रान्त्यन्तरे च ते ॥ १ ॥

End :— अत्र खण्डद्वयेपि जिनज्यागुणस्त्रिज्याहरस्तत्रापरखण्डे त्रिज्ययोर्गुणहरयोस्तुल्यत्वान्नाशाज्जिनज्याशिष्टाभुजोत्क्रमज्या जिनज्यागुण-त्रिज्या-भक्ता फलेनोना जिनज्या सत्रिभग्रहक्रान्तिज्या तुल्यैवेति बोध्यम् । एवं सर्वत्र बुद्धिमता ज्ञेयमिति ॥

Colophon — इति श्रीमच्छ्रीनीलाम्बरशर्मविरचिता वलनटीका समाप्ता ॥ * ॥ श्रीःपातु ॥ - ॥

विषयः । गोलाध्यायवलनव्याख्यानम् ॥

See text under Cat. No. 48.

No. 334. **वशिष्ठसिद्धान्तः** by **वशिष्ठ** || Vaśiṣṭhasiddhāntaḥ.

Substance :—Character, Maithilī. White paper. Lines, 8 on a page. Letters, 56 in a line. Folia, 5. $13\frac{1}{2} \times 4$ inches. Appearance, tolerable. Verse. Complete. Incorrect. Date, Śaka 1760. Place of deposit, Pandit Anantalāla Jhā, Nanaur, P. O. Tamuria, Darbhanga. A manual of Jyotiṣ-Śāstra by Vaśiṣṭha.

Beginning :— श्री गणेशाय नमः ॥
अणिमादिगुणाधारमप्रतर्क्यमगोचरम् ।
निर्गुणन्निरवद्यं तन्नमामि ब्रह्म सर्वगम् ॥१॥
स्वारोचिषमनाराध्य युगादौ मुनिसत्तमः ॥
अग्रगण्योयमभवन्माण्डव्यो महतां महान् ॥ २ ॥
ग्रहनक्षत्रजं ज्ञानं जिज्ञासुर्ज्ञानमुत्तमम् ।
उपागमन्मुनिश्रेष्ठं वशिष्ठमिदमब्रवीत् ॥३॥
तं ब्रह्मतनयं सृष्टिस्थितिनाशनकारणम् ।
तत्वज्ञानमहं ज्ञातुं ग्रहनक्षत्रसंभवम् ॥४॥

End :— षट्त्वाहोरात्रवृत्तानि बध्वा गुरुमुखोदितं ।
विलोक्य च ग्रहादीनि वदेत्सर्वं शुभाशुभम् ॥९३॥
य इदं शृणुयान्नित्यं पठेद्वा समाहितः ।
ग्रहलोकमाप्नोति सर्वनिर्मुक्तकिल्बिषः ॥९४॥

Colophon :— इति श्रीब्रह्मपुत्रवशिष्ठ विरचितः सिद्धान्तः समाप्तः ॥ शाके १७६० काश्याम् ॥

विषयः । राशिनिरूपणम् । चान्द्रमासादिनिरूपणम् । क्रान्त्यानयनप्रकारकथनम् । ताराग्रहाणां युद्धकथनमित्यादि ॥

Previous notice :—C. C. Pt. I. P. 556. Pt. II. P. 131, 224. Pt. III. P. 118.

No. 335. **वसन्तराजशाकुनम्** by **वसन्तराज** || Vasantarājaśākunam.

Substance :—Character, Maithilī. White paper. Lines, 15 on a page. Letters, 70 in a line. Folia, 38. $11\frac{1}{2} \times 4\frac{1}{2}$ inches. Appearance, old. Verse. Complete. Incorrect. Date, Śaka 1733. Place

of deposit, Pandit Mahīdhara Miśra, Lalbag, Darbhanga. A treatise on Jyotiś-Śāstra dealing with Phalabhāga by Vasantarāja.

Beginning ;—

ओं नमो महागणेशाय ॥
विरञ्चिनारायणशंकरेभ्यः शचीपतिस्कन्दविनायकेभ्यः ।
लक्ष्मीभवानीपथदेवताभ्यस्तथा नवभ्यो नमो ग्रहेभ्यः ॥
बुद्धिं वो नरपक्षिणो द्विचरणा यच्छन्तु हस्त्यादयो
महात्म्यञ्च चतुष्पदा रतिसुखं भृङ्गादयः षट्पदाः ।
उत्साहं शरभादयोष्टचरणाः खर्जूरकाद्यास्तथा
श्रेयोनेकपदा महान्तमपदा भोगं भुजङ्गादयः ॥ २ ॥
भट्टश्रीशिवराजो दोषोन्मिलितमूर्त्तितेजस्वी ।
सूर्य इव सत्यवत्याः समजनि सूनुर्विजयराजात् ॥ ३ ॥
पूर्णकलोप्यकलङ्को जातो वसुधातले सुधाकिरणः ।
तत्पदयोरुपजीवी वसन्तराजोनुजस्तस्य ॥ ४ ॥
अभ्यर्थितोतियत्नात्कृतबहुमानेन बन्धुदेवेन ।
व्यरचयदसौ तदर्थं शाकुनमन्योपकृतये तदर्थं च ॥ ५ ॥

End .—

उत्साहाध्यवसायधैर्यजनकं राज्याभिसम्मानदं
युद्धं द्यूतविवाददिव्यजयदं लक्ष्मीप्रदं क्षेमदं ।
यात्रामन्त्ररसायनौषधिविधौ सिद्धिप्रदं सर्वदा
प्राग्जन्मार्जितकर्मपाकपिशुनं प्रोक्तं महाशाकुनम ॥
वसन्तराजशाकुने सदागमार्थशोभने ।
समस्तसत्यकौतुके कृतं प्रभावकीर्तनम् ॥ * ॥
इति विंशतितमोवर्गः ॥

Colophon .—

समाप्तोयं वसन्तराजशाकुनः ॥ * ॥
रामाग्निसप्तरजनीशमिते च शाके
भाद्रे सितेतरतिथौ प्रतिपत्सचन्द्रे ।
समालिखित्वा ऋतुराजराजं
सूर्योदये द्विजवरो नतशीवनाथः ॥
शाके १७३३ ॥ शुभमस्तु ॥ श्रीरस्तु ॥ ओं नमो महागणेशाय ॥ ४ ॥
॥ * ॥ * ॥ श्री ॥ श्री ॥ श्री ॥

विषयः । राज्याहियुद्धमन्त्रौषधियात्रादयो निरूपिताः ॥

Previous notice :—C. C. Pt. I. P. 622. Pt. II. P. 148, 228. Pt. III. P. 130. H. P. S. Vol. IV. P. 193. C. P. B P. 447.

See commentary under Cat. No. 336.

(A)—**वसन्तराजशाकुनम्** by **वसन्तराज** ॥ Vasantarājaśākunam.

Substance :—Character, Maithilī. Brown paper, Lines, 9 on a page. Letters, 56 in a line. Folia, 83. 14×5 inches. Verse. Appearance, Tolerable. Complete. Correct. Date, Śaka 1768. Place of deposit, Pandit Umādatta Miśra, Salampur, P. O. Ghataho, Darbhanga. A treatise on Jyotiś-Śastra dealing with Phalabhāga by Vasantarāja.

Beginning, End, Colophon, **विषयः**—Same.

(B)—**वसन्तराजशाकुनम्** by **वसन्तराज** ॥ Vasantarājaśākunam.

Substance :—Character, Maithilī White paper. Lines, 11 on a page. Letters, 52 in a line. Folia, 62. 14×5¾ inches. Appearance, fresh. Verse. Complete. Generally correct. Date ? Place of deposit, Raj Library, Darbhanga. A treatise on Jyotiś-Śāstra dealing with Phalabhāga by Vasantarāja.

Beginning, End, Colophon, **विषयः**—Same.

(C)—**वसन्तराजशाकुनम्** by **वसन्तराज** ॥ Vasantarājaśākunam.

Substance :—Character, Devanāgarī White paper. Lines, 9 on a page. Letters, 52 in a line. Folia, 45. 16×6 inches. Verse. Appearance, tolerable. Incomplete. Incorrect. Date, Saṁvat 1898. Place of deposit, Pandit Kamalākānta Miśra, Salampur, P. O. Ghataho, Darbhanga. A treatise on Jyotiś-Śāstra dealing with Phalabhāga by Vasantarāja.

Beginning, **विषयः**—Same. End, Colophon :—Wanting.

(D)—वसन्तराजशाकुनम् by वसन्तराज ॥ Vasantarājaśākunam.

Substance :—Character, Maithilī. Yellow paper. Lines, 12 on a page. Letters, 40 in a line. Folia, 24 $9\frac{1}{2} \times 4\frac{1}{2}$ inches. Appearance, old. Verse. Incomplete. Correct. Date ?. Place of deposit, Babu Jagadīśa Jhā, P. O. Andhrathari, Darbhanga. A treatise on Astrology by Vasantarāja dealing with omens and portents.

Beginning, विषयः—Same. End, Colophon :—Wanting.

No 336. वसन्तराजशाकुनव्याख्या ॥ Vasantarājaśākunavyākhyā.

Substance :—Character, Maithilī. White paper. Lines, 20 on a page. Letters, 83 in a line. Folia, 10. 16 × 6 inches. Appearance, fresh. Prose Complete. Correct. Date, Saṁvat 1907. Place of deposit, Pandit Kamalākānta Miśra, Salampur, P. O. Ghataho, Darbhanga. A brief note on Vasantarājaśākuna. Anonymous.

Beginning.— श्रीगणेशाय नमः ॥ अथ वसन्तराजाख्यशाकुनग्रन्थटिप्पणं लिख्यते ॥ तत्र मङ्गलार्थाः स्पष्टाः । अथ संज्ञापरिचयं करोति । तत्र द्विपदा मनुष्याः पक्षिणः प्रसिद्धाः । चतुष्पदा हस्त्यश्ववृषभादयः । षट्पदा भ्रमरादयः । अष्टपदाः शलभादयः अनेकपदा खर्जूरादयः । अपदाः सर्पादयः एतेषां गतिस्वरालोकनभावचेष्टाः शकुनम् । ता वक्ष्यन्ते ॥

End :— एते श्वानशकुनाः संपूर्णशोभनफलप्रदाः सन्तीति निश्चितं ज्ञातव्यम् ॥

Colophon :— इति वसन्तराजनामकशाकुनग्रन्थटीकायां सारमेयशकुनो नाम विंशतितमो वर्गः ॥ समाप्तश्चायं ग्रन्थ इति ॥ शुभमस्तु ॥ श्रीगणेशदिनेशमहेशा जयन्ति ॥

अनन्तवासरे वसन्तराजसंज्ञशाकुनं
लिलेख भूखगोमहीमिते तु वैक्रमे शके ॥

विषयः । वसन्तराजशाकुनटीका ॥

See text under Cat. No. 336.

No. 337. वार्षिकमुद्दादशा ॥ Vārṣikamuddādaśā.

Substance:—Character, Maithilī. White paper. Lines, 12 on a page. Letters, 36 in a line. Folia, 2. $12 \times 4\frac{1}{2}$ inches. Appearance, old. Prose. Complete. Incorrect. Date ? Place of deposit, Pandit Suvaṁśalāla Jhā, Sukpur. P. O. Sukpur, Bhagalpur. (Resident of Bārā, adjacent to Pachagachia P. O.). Slightly damaged. The Ms. deals with horoscopy. Anonymous.

Beginning :— अथ वार्षिकमुद्दा दशा ॥
जन्मर्क्षसंख्यासहिता गताब्दा द्गुनिता नन्दहृतावशेषा ।
आचंकुराजीसवुकेशुपूर्वा ग्रहा दशास्वामिन एवमूह्यम् ॥
र १८ चं २० कु २१ रा ५४ बृ ४८ श ५७ के २१ शु ६० ॥ फलमस्य ॥
अथरविमहादशाफलम् । चित्तोद्वेगमनःकण्ठव्ययसञ्चारस्वजनैर्वि-
मनस्यम् ॥

End :— शुश० ९ । २० । वृद्धाङ्गनासत्कारपुरनगरमनतोषशत्रुशान्तिमित्रोदयः ।
शु० बु० ८ । ३० असहितमनस्तिकथाप्रमोदमित्रमध्याव्यापरताधिव्या-
मिष्टान्नाशनम् । शु० के ३ । ३० बन्धुकलह-शत्रुवैमनस्यवस्त्राहार-
कर्मचाञ्चल्यः ॥

Colophon:— इति वार्षिकमुद्दादशान्तर्दशासमाप्तम् ॥

विषयः । वर्षप्रवेशप्रणयने ग्रहाणां दशान्तर्दशाविचारः ॥

(A)—वर्षिकमुद्दादशा ॥ Vārṣikamuddādaśā.

Substance:—Character, Maithilī. Brown paper. Lines, 10 on a page. Letters, 45 in a line. Folia, 3. $11 \times 3\frac{1}{2}$ inches. Appearance, old. Prose. Incomplete. Incorrect. Date ?. Place of deposit, Pandit Raghunātha Jhā, Sanakorthu, P. O. Manigachi, Darbhanga. An elementary treatise on horoscopy. Anonymous.

Beginning, End, Colophon, विषयः—Same.

No. 338. वास्तुचक्रम् ॥ Vāstuchakram.

Substance :—Character, Maithilī. White paper. Lines, 9 on a page. Letters, 34 in a line. Folia, 4. 11×4 inches. Appearance, fair. Prose and verse. Complete. Incorrect. Date ?. Place of deposit, Pandit Vāsudeva Jhā, Sukpur, P. O. Sukpur, Bhagalpur. A hand-book of Jyotiṣ-Śāstra dealing with the worship of domestic deities at the time of taking new abode. Anonymous.

Beginning :— श्रीगणेशाय नमः ॥ अथ वास्तुचक्रम् ॥
वास्तुचक्रं प्रवक्ष्यामि स्थापितो वृषभस्तथा ।
यस्मिन् ऋक्षे स्थिते भानुस्तदादौ तृणि मस्तकेत्यादि ॥
सूर्याक्रान्त्यान्त्यजेत्सप्त ततश्चैकादशा शुभा ।
ततोपि दश ऋक्षाणि वास्तुकर्मणि वर्जितः ॥
तद्भूमौ सर्पाकारं वास्तु परिकल्प्य तस्य क्रोडे नाभौ वास्तुखातं खनेदिति ॥

End :— एवमुच्चार्यं दातव्यो बलिः कुलजनप्रियः ।
यदि न भुज्यते वत्स तदा नैव शुभं भवेत् ॥
शुभं यदि भवेत्तत्र भुज्यते तदशेषतः ।
एवं कृत्वा महादेव शान्तिः स्वस्त्ययनं चरेत् ॥

Colophon :— इति शिवाबलिविधिः ॥

विषयः । वास्तुचक्रम् । वास्तुपूजापद्धतिः । वास्तुप्रवेशे शकुनविचारः । शिवाबलिदानविधिश्चेति ॥

No. 339. वास्तुपूजापद्धतिः ॥ Vāstupūjāpaddhatiḥ.

Substance :—Character, Maithilī. White paper. Lines, 8 on a page. Letters, 40 in a line. Folia, 3. 11½×4 inches. Appearance, old. Prose and verse. Complete. Incorrect. Date, Śaka 1775. Place of deposit, Babu Satyanārāyaṇa Miśra, Balava, P. O. Nowhatta, Bhagalpur. A manual of Jyotiṣ-Śāstra dealing with the worship of Vāstudevatā. Anonymous. The Ms. cantains kānanotsarga also together with vāstupūja.

Beginning.— ओं नमो गणेशाय ॥ अथ वास्तुपटलम् ॥ वास्तुदिनं प्रथमतः सालंकृते वस्त्राच्छादितदैवज्ञं वाग्रकृत्वा तत्पश्चाद्गुरुः तत्पश्चात्पुरोहितं तत्पश्चाद्गृहपतिः ॥

शाकं दधि च माषञ्च तण्डुलं द्विदलं तथा ।
कृत्वा गृहपतेरग्रे नववेश्म प्रवेशयेत् ॥
मन्त्रं पठित्वा तत्र मन्त्राः ।
ओं इष्टदेव नमस्तुभ्यं गृहदेव नमोनमः ।
ग्रामदेव नमस्तेस्तु कुलदेव नमोनमः ॥
पितरस्तु नमस्तुभ्यं पितृमातृकुलं तथा ।
सर्वकृपा भवेद्यस्तु स्थानञ्च सकलं गुरुः ॥

End.— कुशत्रयतिलजलान्यादाय अमुके मास्यमुके पक्षे अमुकतिथौ अमुकगोत्रस्य अमुकशर्मणाऽपरोगणसेवितं दिव्यविमानारोहपूर्वक एतद्वृक्षशाखापत्रफलसंख्यकवर्षसहस्त्रावच्छिन्नस्वर्गलोकनिवासमत्र तान् आम्रवृक्षान् वनस्पतिदैवतान् सर्वभूतोपयोगित्वेन मयोत्सृष्टः ॥ ओं अद्यकृतैतत्काननोत्सर्गप्रतिष्ठा गामेकां रुद्रदैवतां यथानामगोत्राय ब्राह्मणाय दक्षिणामहं ददे ॥

Colophon :— Wanting.

Post Colophon :— शाके १७७९ सन १२६१ साल ज्येष्ठकृष्णाष्टमी चन्द्रे लिखितमिदं पुस्तकं श्रीनेनमनिशर्मणः । श्रीरस्तु । शुभमस्तु ॥

विषयः । वास्तुपूजाविधिः । वनोत्सर्गविधिश्चेति ॥

No. 340. वास्तुप्रकरणम् ॥ Vāstuprakaraṇam.

Substance :—Character, Maithilī. White and yellow paper. Lines, 11 on a page. Letters, 50 in a line. Folia, 8. 11 × 5 inches. Prose and verse. Appearance, fresh. Complete. Incorrect. Date, Śaka 1802. Place of deposit, Pandit Gaurīkānta Jhā, Devahi, P. O. Tamuria, Darbhanga. A hand-book of Jyotiś-Śāstra dealing with Vāstuvichāra. Anonymous.

Beginning.— ओं नमो गणेशाय नमः ॥ अथ ग्रामचक्रम् ॥
ग्रामं यत्र भवेदृक्षं तदापि सप्तसमस्तके ।

पृष्ठे सप्त सप्त हृदि पादयोः सप्त तारकाः ।
फलं ।
म्मुखे च धनी मानी पृष्ठे हानिश्च निर्धनः ।
दये सुखसंपत्तिः पादे पर्य्यटनं सदा ।
थ वास्तुविचारः ।
वास्तुचक्रं प्रवक्ष्यामि वृषाकारं सुशोभनं ।
यस्मिन्नृक्षे स्थितो भानुस्तदाद्यं त्रीणि मस्तके ।
द्वे द्वे चैवाग्रपादे तु द्वे द्वे पश्चिमपादयोः ।
पृष्ठे च त्रीणि ऋक्षाणि दशकुक्षौ चतुष्टयं ॥

End.— वैशाखे श्रावणे चैव मार्गकार्त्तिकफाल्गुनाः ।
मासा ग्राह्या वास्तुकार्यं पत्नीपुत्रसमृद्धिदा ॥
शुक्लपक्षे भवेत्सौख्यं कृष्णे तस्करपीडनं ।
तस्माद्विचार्य कर्त्तव्यं यदीच्छेच्छ्रेयमात्मनः ॥
शशिनि भवति पुत्री भास्करे वित्तनाशो ।
बहुवह रविसूनौ भूमिपुत्रे विनाशं ।
बुधगुरुकविवारे धर्मकामार्थसिद्धिं ।
वदति खलु वराहो वास्तुवेश्मप्रवेशे ॥

Colophon.— इति वास्तुप्रकरणं समाप्तं ॥ श्रीरस्तु० ॥ शुभमस्तु ॥
नेत्रे वियद्धृतिर्जाते शालिवाहनसंज्ञके ।
तपस्यग्निमिते वारे दैत्येज्ये भाग्यविद्द्विजे ।
नशाविदारणसंज्ञेन वास्तुप्रक्रियेण च ।
लिखित्वा स्वार्थहेतुत्वे पक्षे शुभ्रदलेरपि ॥०॥०॥०॥०॥

विषयः । वास्तुविचारः ।

No. 341. वास्तुप्रकरणम् ॥ Vāstuprakaraṇam.

Substance:—Character, Maithilī. White paper. Lines, 10 on a page. Letters, 48 in a line. Folia, 4. $12\frac{1}{2} \times 5$ inches. Appearance, fair. Prose and verse. Complete. Incorrect. Date ? Place of deposit, Pandit Santoṣī Jhā, Balaha, P. O. Sukpur. Bhagalpur. Slightly damaged. Anonymous.

Beginning — ओं नमो गणेशाय ॥

अथ वास्तुप्रकरणम् । अथ वास्तुगृहमध्ये । भुजबलभीमे च ॥
दक्षिणे पश्चिमे चैव नैर्ऋते वायुमेव च ।
एभिरुच्चो भवेद्भूमौ गजपृष्ठे विधीयते ॥

तत्र

गजपृष्ठे भवेद्वासो लक्ष्मीधनवान्भवेत् ।
आयुर्बुद्धिकरो नित्यं जायते नात्र संशयः ॥
मध्योच्चं भवेद्यत्र नीचं भवति चतुर्दिशम् ।
कूर्मपृष्ठो भवेद्भूमौ तत्र वासो विधीयते ॥

End — अथ शिवाशकुनविचारः ।

शक्रे चौरादिशङ्का हुतभुजि विविधक्लेशभीतिश्च याम्ये
सौख्यं कल्याणवित्तं दितितनयदिशामल्पकालस्थितिश्च ।
वारुण्यां वित्तलाभोऽनिलदिशि सुहृदामुत्तरस्यां स्थिरत्वं
वासे संमानमैश्वं शिवदिशि निधनं वास्तुवेश्मप्रवेशः ॥

Colophon.— इति वास्तुप्रकरणं संपूर्णं ॥

विषयः । भूमिनिर्णयः । वास्तुपूजनप्रकारः । शिवाशकुनविचारः ॥

A– वास्तुप्रकरणम् ॥ Vāstuprakaraṇam.

Substance:—Character, Maithilī. Nepalī paper. Lines, 9 on a page. Letters, 32 in a line. Folia, 7. $10\frac{1}{2} \times 4\frac{1}{2}$ inches. Appearance, old. Prose and verse. Complete. Incorrect. Date ? Place of deposit, Pandit Jayānanda Miśra, Parsarma, P. O. Parsarma, Bhagalpur. A manual of Jyotiś-Śāstra dealing with the examination of land for taking new abode and domestic deities. Anonymous. Worn out. Very much damaged.

Beginning, End, Colophon, विषयः—Same.

B—वास्तुप्रकरणम् ॥ Vāstuprakaraṇam.

Substance:—Character, Maithilī. White paper. Lines, 10 on a page. Letters, 94 in a line. Folia, 4. 11×4 inches. Appearance, old. Prose and verse. Complete. Incorrect. Date, Śaka 1714.

Worn out. Torn. Place of deposit, Pandit Sītārāma Pāṭhaka, Karnapur, P. O. Sukpur, Bhagalpur.

Beginning, End, Colophon, विषयः – Same.

C—वास्तुप्रकरणम् ॥ Vāstuprakaranam.

Substance:—Character, Maithilī Nepalī paper. Lines, 8 on a page. Letters, 40 in a line. Folia, 6. $12 \times 4\frac{1}{2}$ inches. Appearance, fair. Prose and verse. Complete. Incorrect. Date, Śaka 1765 Place of deposit, Pandit Dharmadatta Miśra, Babhanagama, P. O. Supaul, Bhagalpur. A manual of Jyotiś-Śāstra dealing with Vāstuvichāra Anonymous.

Beginning, Colophon, विषयः —Same.

End —

ध्वजे विभूतिं मरणञ्च धूमे सिंहे धनं स्वा च करोत्यनर्थम् ।
वृषे च भोगी खरकेतिदुःखी गजे सुखं काकपदे विनाशः ॥
ध्वजं पूर्वे गृहं विद्यादाग्नेय्यां धूममेव च ।
सिंहन्तु दक्षिणागारं नैर्ऋत्यां श्वानमेव च ॥
वृषस्तु पश्चिमे ज्ञेयं वायव्ये खरमेव च ।
उत्तरे च गजं विद्यां कामैशालङ्कृं गृहम् ॥

No. 342. वास्तुप्रदीपः by वासुदेव । Vāstupradīpaḥ.

Substance:—Character, Maithilī Brown paper. Lines, 8 on a page. Letters, 33 in a line. Folia, 18. 13×5 inches. Appearance, fair. Verse. Complete. Incorrect. Date, Saṁvat 1934, Śaka 1799 & san 1285. Place of deposit, Pandit Muktināth Jhā, Baruary, P. O. Parsarma, Bhagalpur. A manual of Jyotiś-Śāstra dealing with the foundation of house by Vāsudeva. Slightly damaged.

Beginning—

श्रीगणेशाय नमः ॥
विद्वच्छाब्दिकसङ्कतोक्तिरचनैर्यद्वास्तुविद्यावता-
मानन्दाभिगमो भवेन्मुनिमतः सज्ज्योतिरुद्द्योतितः ।
तत्संप्रत्यपि वासुदेवसुधिया वास्तुप्रदीपाभिधो
ज्योतिर्वेदविदां विधीयत इति प्रत्यक्षदृग्बुद्धये ॥१॥

गेहपतिसद्मविश्रुवादितः षोडशगृहविवारतस्ततः ।
तस्य सद्म सुखमुत्तमं भवेत्स्वायुरावधिकसद्यशोन्वितम् ॥२॥
भूमीश्वराणामथ भूः सितेष्टा या रक्तवर्णा नृपतेः प्रशस्ता ।
पीता च वैश्यस्य च कृष्णवर्णा शस्ता समस्ता खलु शूद्रजातेः ॥३॥

End.— शरादिवस्वैः प्रमिते शकाब्दे त्विषे सिते चन्द्रदिने दशम्याम् ।
वास्तुप्रदीपो रचितः स्वबुद्धया श्रीवासुदेवेन मगद्विजेन ॥

Colophon— इति श्री वासुदेवपण्डितविरचिते वास्तुप्रदीपे गृहप्रवेशः प्रकरणम् ॥ समाप्तोयं ग्रन्थः ॥

Post Colophon.— सम्वत् १९३४ शाके १७९९ सन १२८९ साल माघ कृष्णषष्ठ्यां गुरौ काश्यां श्री पञ्चाननेनेयं लिखितमि पुस्तकम् ॥ श्रीरस्तु ॥ शुभमस्तु ॥ श्री विश्वेश्वरादिभ्यो नमः ॥ ;०: ॥ :०: ॥

विषयः । भूनिर्णयः । भूखननविचारः वृक्षरोपणविचारः । ग्राममैत्री । गृहविस्तारादि वास्तुशकुनानि । द्वारचक्रम् । गृहप्रवेशः ॥

Previous notice:—C. C. Pt. I. P. 568.

A—वास्तुप्रदीपः by वासुदेव Vāstupradīpaḥ.

Substance:—Character, Devanāgarī. White paper. Lines, 8 on a page. Letters, 27 in a line. Folia, 22. 10×4 inches. Appearance, fair. Verse. Complete. Incorrect. Date, Saṁvat 1874. Place of deposit, Pandit Chiranjīva Jhā, Babhanagama, P. O. Supaul, Bhagalpur. At the end of a chapter the author states that he was the son of Yogānanda & belonged to Harivaṁśa family and he was a resident of नवापारदेश ।

Beginning, End, Colophon, विषय:—Same.

Post Colophon:— संवत १८७४ माघवदी १० लिखितं जैलालडपाध्या काश्यां मध्ये श्रु वेश्वर समीपे ॥ इदं पुस्तकं पठनार्थममात्मजः ॥ समाप्तं । शुभमस्तु । श्रीरस्तु कल्याणमस्तु । रामश्रीः । श्री :०: श्री :०: श्री :०: श्री

(C)—वास्तुप्रदीपः by वासुदेव ॥ Vāstupradīpaḥ.

Substance:—Character, Maithilī. White paper. Lines, 8 on a page. Letters, 26 in a line. Folia, 21. 9×3½ inches. Verse.

Appearance, tolerable. Complete. Incorrect. Date. Śaka 1777. Place of deposit, Pandit Gopāla Miśra. Tabhaka ,P. O. Dalsinghsarai, Darbhanga. A manual of Jyotiś Śāstra dealing with the construction of house by Pandit Vāsudeva.

Beginning, End, Colophon. विषयः —Same.

No. 343. वास्तुप्रदीपः ॥ Vāstupradīpaḥ.

Substance :—Character, Maithilī Blue paper. Lines, 13 on a page. Letters, 62 in a line Folia, 12. 14 × 4½ inches. Appearance, old. Prose and verse Complete. Incorrect. Date, Śaka 1794. Place of deposit, Pandit Umādatta Miśra, Salampur, P. O. Ghataho, Darbhanga A hand-book of Jyotiś-Śāstra dealing with वास्तुविधान All sanskrit Ślokas and Prose are translated side by side in Maithilī dialect. Anonymous.

Beginning — श्रीगणेशाय नमः ॥ अथ गृहप्रकरणम् । तत्रादौ मैत्री ॥
यद्ग्रामभंदु २ ङ्क ९ खतेश ५ । ११ । काष्ठा १०
मित्रं भवेल्लाभमतं शुभस्थः ॥
यदि शशाङ्का १ ग्नि ३ नगा ७ ब्धि ४ तुल्यं
मध्ये ८, षष्ठा ६ र्क १२ मतो निषिद्धम् ॥
तत्र भाषा ॥ अपन जन्मराशि सं जाहि ग्रामक राशि दोसर २ नवम ९ पांचम ५ एगारहम ११ दशम १० होए से ग्राम शुभ जानव । अपन जन्मराशि सं जाहि ग्रामक राशि पहिल १ तेसर ३ सातम ७ चारिम ४ होए से ग्राम मध्यम जानव । यँ अपन जन्मराशि सं जाहिं ग्रामक राशि छठम ६ आठम ८ बारहम १२ होए से ग्राम निषिद्ध जानव ओहि ग्राम नहि बसब ॥

End :— सन्तोषयुक्तोभिमुखः प्रविश्य गणेशनामस्मरणानि तानि ।
ज्योतिर्विदा स्वर्णतुरङ्ग दक्षाद्यथाभिलाषं द्विजभोजनं च ॥ * ॥

Colophon :— इति श्रीवास्तुप्रदोपे गृहारम्भे गृहप्रवेशविधानं समाप्तम् ॥ * ॥ शाके १७९४ सन १२४० साल श्रीलालस्य लिपिरियं पुस्तकम् ।

विषयः । नूतनगृहारम्भविचारः ।

No. 344. वस्तुरत्नावली by जीवनाथ Vāsturatnāvalī.

Substance:—Character, Maithilī. White paper. Lines, 12 on a page. Letters, 56 in a line. Folia, 23. 12 × 5½ inches. Appearance, fair. Prose and verse. Complete. Generally correct. Date, Śaka 1794. Place of deposit, Pandit Sītārāma Pāṭhaka, Karnapur, P. O. Sukpur, Bhagalpur. A treatise on Jyotiś-Śāstra by Jīvanātha.

Beginning.— श्रीगणेशाय नमः ।

अब्जा हृत्पद्ममध्ये विलसति लपने शारदा सारदाम्नी
मुक्ताकुन्देन्दुकान्तिर्नयनकुवलये पुष्पवन्तौ धरित्री ।
अद्धा यस्याग्रदन्ते तिलकमिव पदे सिद्धिसंघा लुठन्ति
प्रह्लादव्रातदाता स दिशतु जगतां मङ्गलं चक्रपाणिः ॥ १ ॥
वराहलल्लोदितवास्तुयुक्तिं समीक्ष्य बुध्या क्रियते मयेयम् ।
पुरातनानां वचनैः पवित्रा श्रीवास्तुरत्नावलिका विचित्रा ॥ २ ॥

End·— शाके तर्करसागचन्द्रमिलिते पक्षे वलक्षेतरे ।
चैत्रे मासि भृगोर्दिने स्मरतिथावेषा गता पूर्णताम् ॥
नानाचार्यमतं विलोक्य रचिता श्रीवास्तुरत्नावली ।
श्रीमन्मैथिलजीवनाथकृतिना दैवज्ञमोदप्रदा ॥ * ॥

Colophon :— इति श्रीमैथिलशम्भुनाथदैवज्ञात्मजजीवनाथदैवज्ञविरचिता वास्तुरत्नावली समाप्ता ॥

Post Colophon·— शाके १७९४ सन १२७९ साल ज्येष्ठकृष्ण ९ गुरौ लिखितमिदं श्रीफेकनशर्मणा काश्यां ॥

विषयः । वास्तुविचारप्रकरणम् । दशाप्रकारः । लाभालाभविचारः । ग्रामवास फलम् । शिवानिरूपणम् । द्वारनिवेशः । वर्णविचारः । गन्धः । भूमेः प्लुवत्वफलम् । भूमिवर्णविचारः । भूमिलक्षणम् । गृहारम्भे मासफलम् । वृषवास्तुचक्रम् । शङ्कुन्यासः । वास्तुवारनक्षत्राणि । तिथिफलम् । खातारम्भः । वास्तुकाले पूजनीयाश्च वाः । वास्तुलग्नकुण्डलीफलम् । गजशालानिर्माणः । पुष्पवाटिका । नगररचनाप्रकारः । पुराणां गुणदोषौ ।

गृहप्रवेशप्रकरणम् । जीर्णगृहप्रवेशः । नूतनगृहप्रवेशदिनात्प्राक् वास्तुपूजा । कलशचक्रम् ।

(A)—वास्तुरत्नावली by जीवनाथझा ॥ Vāsturatnāvalī.

Substance :—Character, Maithilī Yellow and white paper. Lines, 11 on a page. Letters, 44 in a line. Folia, 30. 13 × 4½ inches. Appearance, old. Prose and verse. Incomplete. Incorrect. Date ? Place of deposit, Pandit Suvaṁśalāla Jhā, Sukpur, P. O. Sukpur, Bhagalpur. (Resident of Bara, adjacent to Pachagachia. P. O.) A treatise on Jyotiṣ-Śāstra by Jīvanātha Jhā, The missing folia are 7, 10, 11 25 and 26 The last page is also missing. Very much damaged.

Beginning, विषयः—Same, End, Colophon :—Wanting.

End of Ms. :— शक्तं प्राक् शरिता परत्र कमलं याम्ये नदीधार्मिकं
द्वाभ्याञ्चैव महाधनञ्च धनदाशायां नदीसौम्यकम् ।
दुर्गेकेन युतं श्रियाक्षनगरं द्वाभ्यां रिपुघ्नं पुरम्
द्वाष्टारं कथयन्ति स्वस्तिकमिति प्रोक्ता गुणा विंशतिः ॥
भूपानां सुखदा यशोऽर्थफलदा कीर्त्तिप्रतापोद्भवा
लोकानाञ्च विनाशितोपि रचना प्राक् शम्भुनेमे गुणाः ॥ इति ॥

(B)— वास्तुरत्नावली by जीवनाथ ॥ Vāsturatnāvalī.

Substance .—Character, Maithilī. White paper. Lines, 15 on a page. Letters, 50 in a line. Folia, 4. 14 × 5½ inches. Appearance, fresh. Prose and verse. Incomplete. Generally correct. Date ? Place of deposit, Pandit Śrīnandana Miśra, Kanhauli, P. O. Sakri, Darbhanga. A hand-book of Jyotiṣ-Śāstra dealing with Vāstuvichāra. Worm eaten.

Beginning, विषयः – Same End, Colophon :—Wanting.

(C)—वास्तुरत्नावली by जीवनाथ ॥ Vāsturatnāvalī.

Substance :—Character, Maithilī White paper. Lines, 10 on a page. Letters, 32 in a line. Folia, 60. 9 × 3½ inches.

Prose and verse Appearance, tolerable. Complete. Incorrect. Date, Śaka 1777 Place of deposit, Pandit Gapāla Miśra, Tabhaka, P. O. Dalsinghsarai, Darbhanga. A treatise on Jyotiś-Śāstra dealing with the construction of house

Beginning, Colophon, विषयः—Same. End, differs.

End:— अथ प्रवेशे कर्तव्यतामाह ॥
एवं छलग्ने स्वगृहं प्रविश्य वितानपुष्पश्रुतिघोषयुक्तम् ।
शिल्पज्ञदैवज्ञविप्रिज्ञपौरान्राजार्चयेद्भूमिहिरण्यवस्त्रैः ॥

No. 345. वास्तुविचार ॥ Vāstuvichāraḥ.

Substance:—Character, Maithilī. White paper. Lines, 11 on a page. Letters, 32 in a line. Folia, 8. 11 × 4½ inches Appearance, old. Verse Complete. Incorrect. Date ? Place of deposit, Pandit Rudrānanda Jhā, Parsarma, P. O. Parsarma, Bhagalpur. Worn out. Very much damaged. Anonymous.

Beginning:— श्रीगणेशाय ॥ अथ वास्तुविचारः ।
चतुश्चक्रविशुद्धोसौ चतुर्वर्गफलप्रदः ।
नक्षत्रचक्रं राशिचक्रं ग्रामचक्रं तथैव च ॥
वर्गचक्रं तथा प्रोक्तं पुराणमुनिभिः शुभैः ॥

End.— सप्तसकारलक्षणम् ॥
शनौ स्वाती हरिलग्ने शुक्लपक्षे च सप्तमी ।
शुभे योगे श्रावणे च सप्तसकारप्रकीर्त्तितः ॥
सप्तयोगे भवेद्वास्तु सत्पुत्रो धनिको भवेत्
गजाश्वधनसंपत्ति पुरे तिष्ठति सर्वदा ॥

Colophon:— Wanting

Post Colophon— इति श्री उमानाथशर्मलिखितपुस्तकं स्वार्थम् । शुभमस्तु । श्रीरस्तु ॥ * ॥

विषयः । वास्तुविचारः । राशिवर्गौ च । गृहविचारः । व्ययादिशुद्धिः । वास्तुचक्रम् । वास्तुकुण्डली । नागदिग्वासः । वास्तुचक्रम् । वास्तुनक्षत्रम् ।

नक्षत्रविचारः । गृहप्रकरणम् । ध्वजादिः । वास्तुपूजा । शिवाशकुनम् । सप्तसकारलक्षणम् ॥

No. 346. वास्तुविचारः ॥ Vāstuvichāraḥ.

Substance :—Character, Maithilī. White paper. Lines, 9 on a page. Letters, 44 in a line. Folia, 3. $11 \times 3\frac{1}{2}$ inches. Appearance, old. Prose and verse. Complete. Incorrect. Date, San 1279 Sāl. Place of deposit, Pandit Santoṣi Jhā, Balaha, P. O. Sukpur, Bhagalpur. Worn out. Slightly damaged. Anonymous.

Beginning :— ओं नमो गणेशाय नमः ॥
शुक्लपक्षे भवेत्सौख्यं कृष्णे तत्करपीडनम् ।
तस्माद्विचार्य कर्त्तव्यं यदीच्छेच्छ्रियमात्मनः ॥
रिक्ताभावात्या षष्ठी च वर्जयेत्तिथिपञ्चकम् ।
कुजे रवौ तथा चन्द्रे वर्जयेद्वास्तुपूजनम् ॥
द्वितीया तृतीया चैव पञ्चमी सप्तमी तथा ।
दशम्येकादशी चैव वास्तुपूजनकर्म्मसु ॥

End :— नागपृष्ठो नरो वासो लक्ष्मी दूरेण तिष्ठति ।
पत्नीहीनो बन्धुहीनो जायते नात्र संशयः ।
शनौ स्वाती हरिदिने शुक्लपक्षेषु सप्तमी ।
शुभयोगे श्रावणे च सप्तसकार प्रकीर्तिताः ॥
सप्तयोगे भवेद्वास्तु सपुत्रो धनिको भवेत् ॥

Colophon :— Wanting.

Post Colophon :— श्रीरस्तु शुभमस्तु ॥ शुभशाके १७ सन १२७८ साल कार्तिक कृष्ण-सप्तम्यां शनौ ॥

विषयः । वास्तुविचारः । वास्तुपूजापद्धतिः ॥

No. 347. विघ्नराजध्वजादियोगपरिमाणम् ॥ Vighnarājadvajādiyoga-parimāṇam.

Substance :—Character, Maithilī. White paper. Lines, 8 on a page. Letters, 42 in a line. Folia, 4. $11\frac{1}{2} \times 4$ inches.

Appearance, old. Verse. Complete Incorrect. Date ? Place of deposit, Babu Phudī Jhā, Barail, P. O. Parsarma, Bhagalpur. A hand-book of Jyotiṣ-Śāstra dealing with questioning. Very much damaged. Anonymous.

Beginning :— ओंनमःकालिकायै ॥
अथ भूतभविष्यवर्त्तमानप्रश्नज्ञानम् ॥
आयप्रष्णमिदं पद्यं चमत्कृतकरं मयम् ।
उक्तध्वजादिफलं नामाद्यक्षरसतोथवा ॥
अकारादिवर्गैः कृत्वा ध्वजादयः ॥ आयविकल्पनोया ॥ यथा ॥
ध्वजधूम्रश्च सिंहश्च श्वानो वृषः खरो गजः ।
ध्वांक्षश्चायाष्टकं ज्ञेयं शुभाशुभमिदं स्फुटम् ॥

End.— अथ शत्रुगमागमप्रश्नः ॥
गजे वृषे ध्वजे सिंहे शत्रूणां शीघ्रमागतः ।
श्वाने खरे तथा धूम्रे ध्वांक्षे च नहि चागमः ॥
अथ स्थायिनो जयपराजयप्रश्नः ॥
ध्वजे गजे वृषे सिंहे स्थायिने जयसम्भवः ।
खरे श्वाने तथा ध्वांक्षे च जायिनो जयः ॥

Colophon :— इति विघ्नराजध्वजादियोगपरिप्रमाणसमाप्तम् ॥ शुभमस्तु ॥ श्रीरस्तु ॥

विषयः । अस्तिनास्तिप्रश्नः । लाभालाभप्रश्नः । प्रवासिकुशलप्रश्नः । नष्टलाभप्रश्नः । दिक्षु नष्टवस्तुज्ञानम् । जातिज्ञानम् । दानानि । देवतापूजा । प्रवासिचरस्थिरप्रश्नः । गमनप्रश्नः । कालः । मुष्टिवस्तुवर्णज्ञानम् । धातुज्ञानम् । भूषणज्ञानम् । बालककन्याज्ञानम् । धातुमूलजीवचिन्ताज्ञानम् । पथिकस्य वार्त्ताप्रश्नः । वृष्टिप्रश्नः । दिनानि । स्त्रीलाभप्रश्नः । व्यवहारप्रश्नः । राज्यप्राप्तिप्रश्नः । कार्यसिद्धिप्रश्नः । अधिकारप्राप्तिप्रश्नः । ग्रामप्राप्तिप्रश्नः । बन्दिमोक्षप्रश्नः । धनप्राप्तिप्रश्नः । सत्यासत्यप्रश्नः । सन्धिप्रश्नः । शत्रुगमागमप्रश्नः । स्थयिनो जयपराजयप्रश्नः ॥

No. 343 विचित्रप्रश्नः ॥ Vichitrapraśnaḥ.

Substance :—Character, Maithilī. White paper. Lines, 9 on a page. Letters, 42 in a line. Folia, 5. $11 \times 4\frac{3}{4}$ inches.

Appearance, fair. Verse. Complete. Incorrect. Date ? Place of deposit, Pandit Vāsudeva Jhā, Sukpur, P. O. Sukpur. Bhagalpur. A hand-book of Jyotiś-Śāstra dealing with questioning. Anonymous.

Beginning:— ओंनमो गणेशाय ॥

यदव्यक्तमपि व्यक्त रूपं धृत्वा गजाननः ।
बालं लुठति गौर्यङ्के तन्महो जयति ध्रुवम् ॥ ३ ॥
सुधियोप्यव्यक्तेपि प्रायः प्रश्नोत्तराणि विज्ञातुम् ।
क्लिश्यन्ति ततो वक्ष्ये कतिचित्तद्वगमकान् विधोन्व्यक्तान् ॥ २ ॥

अथ प्रश्नः ।

यो ना कश्चिद्भारं केशभित्वं यान्तरे घटीद्वयतः ।
नीत्वा पञ्चद्रम्मान् भाटं गृह्णाति चेत्स तं भारम् ॥ ३ ॥
नाडीत्रयतः क्रोशद्वयमात्रे संनयेत्तदा तस्मै
भाटं कियत्प्रदेयं वद चेत्त्रैराशिकेऽसि पटुः ॥ ४ ॥

अथ प्रश्नः ।
येषां द्वयोर्द्व योर्घातः स रूपो मूलदो भवेत् ।
तांस्त्रीन् राशीन् वद क्षिप्रं व्यक्ताव्यक्तेऽसि चेत्पटुः ॥ ९० ॥

अस्य भङ्गः ॥

अभीष्टा हृतिः क्षेपहीनेष्टभक्ता
फलं पूर्वराशिर्हरस्तु द्वितीयः ।
तयोः संयुतिर्द्विःस्थिताभीष्टमूला-
द्विहत्या युतोना द्विधा स्यात्तृतीयः ॥ ९१ ॥

Colophon:— इति विचित्रप्रश्नः समाप्तः ॥

विषयः । विविधप्रश्नाः सोपपत्तिपूर्वाः प्रदर्शिताः ।

No. 349. विदग्धतोषिणी by राघवानन्द ॥ Vidagdhatoṣiṇī.

Substance :—Character, Maithilī. White paper. Lines, 9 on a page. Letters, 64 in a line. Folia, 6. 12 × 3¼ inches. Appearance, old. Verse. Incomplete. Generally correct.

Date ? Place of deposit, Pandit Chummana Jhā, Sakhua, P. O. Pipra Bazar, Bhagalpur. Damaged. A manual of Jyotiś-Śāstra dealing with horoscopy by Rāghavānanda. End and colophon are wanting.

Beginning :— ओंनमो गणेशाय ॥
नत्वा सरस्वतीन्देवीं राघवानन्दशर्मणा ।
चक्रे विदग्धतोषाय स्पष्टा जातकपद्धतिः ॥
आदौ छायादिकैर्ज्ञेयो जन्मकालः सुनिश्चितः ।
तत्कालप्रभवाः कार्याः सिद्धान्तोक्तैर्ग्रहस्फुटः ॥

End of Ms . — दशारम्भे शुभे चन्द्रे सौख्यस्त्रीधनलाभदा ।
स्त्रीदोषदा सदा कौजे बौधे विद्या सुखाप्तिदा ॥
धनमानसुखप्राप्तिप्रदा जीवगृहे सदा ।
शौक्रेऽन्नपानसौख्यादि निजगेहे विलासदा ॥
कुस्त्रीप्रदा शनिगृहे दशा तन्नाश्रिता नृणाम् ॥
अतो न लिख्यते आदर्शाभावात् ।

Colophon :— Wanting.

Post Colophon :— शुभमस्तु । श्रीजयकृष्णशर्मणः ॥ पुस्तकञ्च इति ।

विषयः । भावाध्यायः । हृष्ट्यध्यायः । बलाध्यायः । इष्टकष्टफलाध्यायः । परमायुर्दानयनाध्यायः । रिष्टभङ्गाध्यायः । दशान्तर्दशाध्याय ।

Previous notice :—C. C. Pt. I. P. 572.

No. 350. विदशाफलम् ॥ Vidaśāphalam.

Substance :—Character, Maithili. Nepali paper. Lines, 8 on a page. Letters, 30 in a line. Folia, 12. $11\frac{1}{2} \times 4\frac{1}{4}$ inches. Appearance, old. Verse. Complete. Incorrect. Date, Śaka 1760. Place of deposit, Babu Bīlata Jhā, Parsarma, P. O. Parsarma, Bhagalpur. A manual of Jyotiś-Śāstra dealing with horoscopy. Anonymous. Slightly damaged.

Beginning:— ओं नमः श्रीसूर्याय ॥
अथातः संप्रवक्ष्यामि ग्रहाणां विदशाफलम् ।
यवनादिनिबन्धेभ्यः सारमुद्धृत्य लिख्यते ॥
सौम्यः क्रूरदशां मध्ये क्रूरः सौम्यदशाङ्गते ।
मित्रशत्रुगृहं बुध्वा क्रूरः सौम्यस्त्वनिष्टदः ॥
उद्वेगोऽथ चलं चित्तं ज्वरो हानिः शिरोव्यथा ।
ब्राह्मणेन विवादश्च सूर्यस्य विदशाङ्गते ॥

End:— भ्रमते देशग्रामाभ्यां रोगमृत्युमहद्भयम् ।
लाभो द्रव्यस्य चान्यस्य शुक्रस्योपदशां शिखि ॥ शु० के ॥
इति शुक्रस्योपदशा ॥

Colophon :— इति नवग्रहाणामुपदशाफलानि समाप्तानि ॥

Post Colophon :— शाके १७६० कार्तिककृष्णपडिवायं तिथौ भृगौ परसरमाग्रामावस्थित-वेंलोंचसं लिपिरियं स्वार्थम् ॥ श्रीकृष्णाय नमः ॥

विषयः । नवग्रहाणां विदशाफलकथनम् ॥

No. 351. विवाहवृन्दावनम् by केशवार्क (?) ॥ Vivāhavṛndāvanam.

Substance :—Character, Maithilī. White paper. Lines, 10 on a page. Letters, 44 in a line. Folia, 3. 11 × 4½ inches. Verse. Appearance, fresh. Incomplete. Incorrect. Date ? Place of deposit, Pandit Vāsudeva Miśra, Champa, P. O. Benipatti, Darbhanga A manual of Jyotiṣ-Śāstra dealing with Vivāhavichāra. This contains only two complete chapters.

Beginning:— श्रीगणेशाय नमः ॥
श्रीशार्ङ्गिणोः सृजतु वो नवसन्निवेशः
क्लेशव्ययचलवलनयनाञ्चलश्रीः ।
यन्नाञ्चलग्रथनमंगलमाचचार
शृङ्गारहारमणिकौस्तुभरश्मिगुंफः ॥ १ ॥
संवर्यगर्गभृगुभागुरिरेभ्यगीर्भ्यः
सारं वराहमिहिरादिमतानुसारं ।
स्फारस्फुरत्परिमलाढ्यफलं विवाह-

वृन्दावनं विरचयामि विचाररम्यं ॥ २ ॥
ध्रुवानुराधामृगमूलरेवती
करं मवास्वातिरदूषणो गणः ।
रवेरमी नामकरादिषड्गृही
करग्रहे मङ्गलकृन्मृगीदृशाम् ॥ ३ ॥
प्राचेतसः प्राह शुभं भगर्क्षं
सीता तदूढा न सुखं सिषेवे ।
पुष्यस्तु पुष्यत्पतिकाममेव
प्रजापतेराप स शापमस्मात् ॥ ४ ॥

End of Ms.:— अथ मेलकाध्यायः ॥
व्यये न वित्तं न तपस्यपत्यं
नायुर्द्विषत्येव वधूवराणां
द्विर्द्वादशः पञ्चनवाष्टषष्ठो
जन्मर्क्षयोःसख्यविधिर्न दृष्टः ॥ १ ॥
दृश्यते सुहृदभिन्नपतित्वं
क्षेत्रयोस्तदखिलेष्ट्वपि मेलः ।
भीरुभादचलपञ्चतृतोया-
शोकवैरिविपदे वरता वा ॥ २ ॥
नक्षत्रमेकं यदि भिन्नराश्यो-
रभिन्नराश्योर्यदि भिन्नमृक्षं ।
प्रीतिस्तदानीं निविडा नृनार्य्यो
श्चेत्कृतिकारोहिणिवन्न नाडी ॥ ३ ॥

Colophon:— Wanting.

विषयः । विवाहादिनिरूपणम् ॥ वरकन्ययोर्मैत्रीविचारः ॥

Previous notice:—C. C. Pt I. P. 580. Pt. II. P. 137, 225. Pt. III. P. 123. C. P. B. P. 464.

No. 352. वीरसिंहावलोकः by वीर सिंह ॥Vīrasiṁhāvalokaḥ.

Substance :—Character, Maithilī. Nepalī paper. Lines, 10 on a page. Letters, 40 in a line. Folia, 144. $12\frac{1}{4} \times 5$ inches. Appearance, old. Prose and verse. Complete. Incorrect. Date ?

Place of deposit, Raj Library, Baruary, P. O. Parsarma, Bhagalpur. Very much damaged. Worm eaten. A treatise on Jyotiṣ-Śāstra by Sāraṅga at the suggestion of Vīrasiṁha, so the work is called after his name.

Beginning .— श्रीगणेशाय नमः ॥
यच्चक्षुर्भुवनस्य दिव्यममलं धाम श्रुतीनां परम्
यद्ब्रह्मैक निकेतनं च वयसां बीजं यदेकं मतम् ।
सत्रेणाग्निहुतस्य वेदविदितं स्थानं च यत्सर्वदा
तद्वः पान्तु सनातनं हरिमहस्तत्त्वप्रबोधोदयम् ॥
दैवज्ञागमधर्मशास्त्रनिगमायुर्वेदशास्त्रोदधि
नाम...स्फुरदात्मबुद्धिगिरिणाविकारोद्वलम् ।
आलोक्यामृतमातनोति विबुधैरासेव्यमत्यद्भुतं
श्रीमत्तोमरदेववर्मतनयः श्रीवीरसिंहो नृपः ॥

End .— सम्यक् प्रयोगः सर्वेषां सिद्धिमाख्याति कर्मणाम् ।
सिद्धिमाख्याति सर्वैश्च गुणैर्युक्तोभिषग्वरः ॥

Colophon :— इति श्री तोमरवंशावतंशरिपुभूतभैरव श्रीवीरसिंहदेवविरचिते ग्रन्थे वीरसिंहावलोके ज्योतिः शास्त्रकर्मविपाकायुर्वेदोक्तप्रयोगे मिश्रकाध्यायः समर्थितश्चायं ग्रन्थः ।

विषयः । सन्निपातज्वरातीसारभगन्दरस्त्रीरोगबालरोगादीनां कर्मविपाकानुसारेण शान्तिमुक्त्वा ज्योतिःशास्त्रानुसारिणीं शान्तिमनुरुध्यायुर्वेदोक्तदिशा प्रायशोऽखिलानां रोगाणां प्रशमनोपायभूता औषधीः संकलिता : ॥

Previous notice :—C. C. Pt. I. P. 596. Pt. II. P. 142. 226. Pt. III. P. 125.

No. 353. **वृद्धचूडामणिसारः** by **लक्ष्मण (?)** ॥ Vṛddhachūḍāmaṇisāraḥ.

Substance :—Character, Devanāgarī. White paper. Lines, 9 on a page. Letters, 28 in a line. Folia, 20. $10\frac{3}{4} \times 4\frac{1}{2}$ inches. Verse. Appearance, fresh. Complete. Incorrect. Date, Saṁvat 1902. Place of deposit, Babu Chandradeva Jhā, Mahinathpur,

P. O. Jhanjharpur Bazar, Darbhanga. A hand-book of Jyotiṣ-Śāstra dealing with questioning. Anonymous.

Beginning .— ओं श्रीगणेशाय नमः ॥
सदिने सुमुहूर्ते च शकुनोत्साहसंयुते ।
मध्याह्नं चार्धरात्रं वा संध्याक्रूरदिनं त्यजेत् ॥ १ ॥
आतुरे व्यसने रौद्रे नार्त्तः कालमुपेक्षयेत्
संमार्जनोपलिप्ते च पुष्पदीपसमन्विते ॥ २ ॥
फलके चाथवा भूमौ देवतां त्वत्र विन्यसेत् ।
ब्राह्मणं प्रणवस्थं वा उकारे तु महेश्वरम् ॥ ३ ॥
मकारो माधवो देवः सिद्धं सिद्धाक्षरान्वितं ।
दिशश्च वसवो नागा योगिन्यो गृहचर्चका ॥ ३ ॥

End .— ओं ह्रीं कूष्माण्डी कुमारी मम हृदयचिंततं कथय कथय स्वाहा । षडिकामभिमन्त्र्य प्रश्नमारभेत् ।
मैरंतर्योत्तरप्रश्ने मनोवाञ्छितलाभदा ।
अधरैर्मिश्रतास्तेपि स्तोकलाभाः प्रकीर्तिता ॥ १ ॥
उत्तरास्त्वादिमध्यान्ते बहुमध्याल्पलाभदः ।
आदिस्थैरुत्तरै शीघ्रं मध्यस्थैः सर्वनिन्दकः ॥ २ ॥

Colophon .— इति श्री वृद्धचूडामणिसारसमाप्तं शुभम् ॥ संवत् १९१२ ज्येष्ठकृष्ण ९ रविवारे लिखितं पण्डितनाथूरामराजमंदिरसितलाघाटखाडखसमाप्त शुभमस्तु ॥ * ॥

विषयः । पाशनिःक्षेपद्वारा अतीतानागतवर्तमानप्रश्नानां शुभाशुभफलकथनम् ॥

Previous notice :—C. C. Pt. I. P. 189. Pt. II. P. 38, 200. Pt. III. P. 40.

No. 354. **वृद्धवशिष्ठसंहिता** by **वशिष्ठ** ॥ Vṛddhavaśiṣṭhasaṁhitā.

Substance :—Character, Devanāgarī. White paper. Lines, 15 on a page. Letters, 48 in a line. Folia, 102. $9\frac{1}{2} \times 4\frac{1}{2}$ inches. Appearance, old. Verse. Incomplete. Incorrect. Date ? Place of deposit, Pandit Mahīdhara Miśra, Lalbag, Darbhanga.

A treatise on Jyotiṣ-Śāstra by, Vṛddhavaśiṣṭha dealing with Phalabhāga.

Beginning — श्रीवरदमूर्त्तिर्जयति ॥

प्रह्लाम्भोजसुराधरेन्द्रनिकरस्फूर्जत्किरीटोज्ज्वल-
ज्ज्योत्स्नालीढपदारविंदयुगलस्तत्त्वस्वरूपो रविः ।
ब्रह्माण्डोदरसंस्थिताखिलजगत्ध्वांतस्य विध्वंसनं
यः कुर्वन्निखिलं जगत्यनुदिनं पर्यैति कालात्मकः ॥ १ ॥
ज्योतिःशास्त्रं समग्रं प्रथमपुरुषतः स्वर्णगर्भाद्विदित्वा
पूर्वं ब्रह्मा ततो पर्यखिलमुनिगणप्रार्थनाच्चक्रकार ।
तच्चेदं सुप्रसन्नं मृदुपदनिकरैर्गुंह्यमध्यात्मरूपं
शश्वद्विश्वप्रकाशं ग्रहचरितविदां निर्मलं ज्ञानचक्षुः ॥ २ ॥
स्कंधद्वयं वृत्तविचित्रमर्थं
गंभीरमादावधुना यदुक्ता
तत्संहितास्कंधमिदं तृतीयं
वक्ष्ये जगन्मोहननामधेयम् ॥ ३ ॥
क्रतुक्रियार्थं श्रुतयः प्रवृत्ताः
कालाश्रयास्ते क्रतवो निरुक्ताः ।
शास्त्रादमुष्मात्किल कालबोधो
वेदांगता मुख्यतरा प्रसिद्धा ॥ ४ ॥
छन्दःपादौ शब्दशास्त्रं च वक्त्रं
कल्पः पाणी ज्योतिषं चक्षुषी च ।
शिक्षा घ्राणं श्रोत्रमुक्तं निरुक्तं
वेदस्याङ्गान्याहुरेतानि षट् च ॥ ५ ॥

End of Ms. :— अग्निस्तु देवता तत्र कृशरान्नं बलिं हरेत् ।
द्वितीयायां भवेद्व्याधिः पंचरात्रेण मुंचति ॥
ब्रह्मा तु देवता तत्र पायसान्नं बलिं हरेत् ।
तृतीयायां भवेद्व्याधिः सप्तरात्रेण मुञ्चति ॥
उमा तु देवता तत्र.....

Colophon :— Wanting.

Previous notice :—C. C. Pt. I. P. 598.

No. 355. व्यवहारनिबन्धः by श्रीपति ॥ Vyavahāranibandhaḥ.

Substance :—Character, Maithilī. Palm leaves. Lines, 6 on a page. Letters, 48 in a line. Folia, 179. 14 × 2 inches. Appearance, very old. Verse. Incomplete. Correct. Date ? Worm eaten. Place of deposit, Pandit Bachchā Jhā, Hanuman nagar, P. O. Lohat, Darbhanga. A treatise on Jyotiṣ-Śāstra dealing with Vyavahāra by Śrīpati. Very much damaged.

Beginning :— .....

.....वन्दे लम्बोदरविनायकम् ।
गणाधिपन्तु विघ्नेशं सर्वविघ्नोपशान्तये ॥
नारायणं नमस्येहं जगन्नाथ..... ।
.....सिद्धये त्रिदशार्चितम् ॥
यस्याशा वसनं गतिश्च वृषभः खट्वाङ्गशूलं करे ।
चन्द्रश्चारुविभूषणं वरतनौ यज्ञोपवी..... ॥
.....जितश्च मदनो येनान्धको निर्जितो ।
गङ्गा मूर्ध्नि धृता च पुण्यसलिला तस्मै नमः शम्भवे ॥
मतं वराहस्य मतं मुनी.....तिथि वर्त्तते यत् ।
तत्सारभूतं व्यवहारमात्रं निबन्धितं श्रीपतिना स्वबुध्या ॥

End of Ms. :— अनुपहतदेहबुद्धिर्देशकलाकाव्यगणितशिल्पज्ञः ।
अतिमधुरचतुरवाक्यो दीर्घायुः स्याद्धु धे लग्ने ॥ धु ॥
होरासंस्थे जीवे सुशरीरः प्राणवान् दीर्घायुः ।
सुसमीक्षितकार्यकरः प्राज्ञः श्रीमान् सुशीलश्च ॥ धृ ॥
सुनयनवदनशरीरप्र.....

Colophon :— Wanting.

विषयः । ग्रहादीनां फलाफलविचारः ॥

No. 356. व्यवहारनिबन्धः ॥ Vyavahāranibandhaḥ.

Substance :—Character, Maithilī. White paper. Lines, 10 on a page. Letters, 54 in a line. Folia, 19. 12 × 4½ inches. Appearance, old. Verse. Complete. Generally correct. Date ? Place of

deposit, Pandit Yaduvīra Miśra, Khopa, P. O. Phulaparas, Darbhanga. A manual of Jyotiś-Śāstra dealing with the pacifications of several grahas and others. Anonymous.

Beginning :— ओंनमः शम्भवे ॥
कालाधज्ञाः प्रवर्त्तन्ते स कालः सूर्यतो यतः ।
तेनादौ सर्वकार्येषु पूजनीया ग्रहा नृप ॥
देवदानवगन्धर्वाः पिशाचोरगराक्षसाः ।
पीड्यन्ते ग्रहपीडायां किम्पुनर्भुवि मानुषाः ।
आदित्ये द्वादशे चैव रावणः सगणो हतः ।
अष्टमेन शशाङ्केन हिरण्यकशिपुर्हतः ।
अङ्गारकेण वज्रेण रामो राज्याद्विवासितः ।
पाण्डवो बुधपीडायां विकर्मणि नियोजितः ।
गुरुणा जन्मसंस्थेन हतो राजा सुयोधनः ॥०॥

End :— तथाच कौशिकः ।
एतान्बलिप्रयोगांश्च संध्याकाले प्रदापयेत् ।
नैवेद्यगन्धपुष्पैश्च दीपैः खण्डिभश्च पूजयेत् ॥
निशायामवशिष्टायां यामे वृत्ते चतुर्थके ।
ग्रामप्रान्तं ततो नीत्वा नक्षत्रबलिमुत्सृजेत् ।
एवं कृते नरा नूनं संभवन्ति निरोगिनः ।
निरापदा निरातङ्का श्रीवंपुर्वीर्यसंयुताः ।

Colophon :— इति व्यवहारनिबन्धे रोगशान्तिः ॥ शुभमस्तु । श्रीरस्तु ॥

विषयः । ग्रहविचारादिः ॥

No. 357. व्यवहारप्रदीपिका by हरपति ॥ Vyavahārapradīpikā.

Substance :—Character, Maithilī. Nepalī paper. Lines, 13, on a page. Letters, 50 in a line. Folia, 22. 13 × 4½ inches. Appearance, fair. Prose and verse. Complete. Incorrect. Date, Śaka 1769. Place of deposit, Pandit Dharmadatta Miśra, Babhanagama, P. O. Supaul, Bhagalpur. A manual of Jyotiś-Śāstra by Harapati who was in charge of seal. Slightly damag-

ed. The author explained difficult lines by giving equivalent Hindi verses.

Beginning:— नमस्तस्मै महेशाय जगत्त्रयहितैषिणे ।
बालिशा यत्प्रसादेन भवन्ति सुमनीषिणः ॥
नानाग्रन्थात्समाकृष्य श्रीहरपतिधीमता ।
क्रियते बालबोधाय व्यवहारप्रदीपिका ॥

End — एवं ग्रामे चतुःशाले दुर्भिक्षे राष्ट्रविप्लवे ।
पतिना नीयमानायाः पुरःशुक्रो न दुष्यति ॥
यात्रा पुंसवनं तथा परिणयः स्त्रीशुद्धितः शस्यते
शुद्धया वा पुरुषस्य योषिति पुनः स्याद्गोचरेन्दोर्बलं ।
यद्वा दैववशादुपप्लववशात्कालातिपातादिना
शुद्धया चन्द्रनवांशगोचरबलात्सर्वं बुधः प्रारभेत ॥

Colophon :— इति मुद्राहस्तकश्रीहरपतिविरचितजातकोनाम ग्रन्थः समाप्तः ॥०॥

Post Colophon:— शाके १७६९ कार्त्तिकशुक्लतृतीयायाम् ॥

विषयः । तिथिस्वरूपः । नक्षत्रस्वरूपः । नक्षत्रदेवता । योगः । वाराः । ऋतुज्ञानम् । समयशुद्धिः । वेलाज्ञानम् । पलमानसंख्या । राशयः । राशिस्वभावफलम् । मेषादिराशिमानम् । राशीनां दिनभुक्तिः । सूर्यादिग्रहभोगकालः । ग्रहशान्तिप्रकारः । गोचरे शुभस्थानम् । अशुभस्थानस्थितग्रहफलम् । शरीरस्थग्रहकथनम् । चन्द्रगतिगणना । चन्द्रतारानुकूल्यम् । क्षेत्रत्रिकोणः । केन्द्रस्थग्रहसाद्गुण्यम् । स्वगृहम् । ग्रहाणामदृष्टगृहम् । केन्द्रस्थगुरुफलम् । ताराशुद्धिः । लग्नादिसंज्ञा । मुहूर्त्तनाम । दण्डमुहूर्त्तनाम । यात्रायां लग्नादिफलम् । उषादिगुणफलम् । उषादिवेलाफलम् । मध्यान्हकालयोगः । गोधूली । सिद्धियोगः । अमृतयोगः । यात्राप्रशस्तनक्षत्राणि । योगेघटिकात्यागः । दिग्विरोधः । दिग्विरोधे गमने शान्ति । दिक्शूललक्षणम् । सूर्यादिदिने निषिद्धनक्षत्राणि । उत्पातादियोगः । यमघण्टः । दग्धतिथिः । कालतिथियोगः । अयोगे पूर्वयामत्यागः । राहूदयः । योगिन्युदयः । केतूदयदर्शने । भद्रा । पशुयात्रा । कालोदयः । शम्भुचक्रम् । द्वितीयादितिथ्युदितचन्द्रजिज्ञासा । बालकुमारादि । वर्षालक्षणम् । सीमन्तोन्नयनम् । पुंसवनम् । जन्मदिनकृत्यम् । षष्ठिकापूजा । निःक्रमणम् । नामकरणम् ।

अन्नप्राशनम् । कर्णवेधः । चूडाकरणम् । उपनयनम् । समावर्त्तनम् । विद्यारम्भः । धनुर्विद्यारम्भः । गृहवास्तु । गृहप्रवेशः । नवान्नभक्षणम् । नूतनवस्त्रपरिधानम् । कृष्यादिकर्म । कृष्यादिकर्मणि पूजा । पुष्करिणीकूप-होमयज्ञः । पुष्करिण्यादिप्रतिष्ठा । बीजबन्धनम् । धान्यच्छेदनम् । ग्राम-वास । नानावस्तुक्रयविक्रयौ : भैषज्यकर्म । स्नानम् । वृक्षरोपणम् । धननिःक्षेपादि । गर्भापत्यजिज्ञासा । सेवाचक्रम् । पञ्चपर्वकृत्यम् । आवश्यकश्राद्धकालः । संक्रान्ति । हस्तार्के खञ्जनदर्शनम् । कोजागरा-कृत्यम् । कार्त्तिककृत्यम् । वैशाखमासकृत्यम् । श्रीदेवोत्थानम् । जल-पात्रदानम् । शर्करादानम् । आदित्यव्रतसंकल्पः । पञ्चाग्निव्रतसंकल्पः । ग्रहणभूकम्पादिः । यावज्जीवैकादशीसंकल्पः । युगादितिथिः । भीष्माय जलदानम् । ग्रहकुण्डलीविचारः । लग्नादिनामकथनम् । ग्रहाणामुच्चगृहम् । सूतिकावस्थितिज्ञानम् । जातस्य शिरोज्ञानम् । पितृपरोक्षज्ञानम् । मातृहा पितृहायोगः । अरिष्टप्रकरणम् । भावफलम् । नक्षत्रपातः । स्थूलदशा । गण्डान्तलक्षणम् । मूलप्रकारः । विवाहप्रकरणम् । अरिषड्वष्टकलक्षणम् । राशीनां जातिकथनम् । कन्यावरयोगः । आवश्यकशान्तिकथनम् । विवाहे प्रशस्तमासाः । नक्षत्रलग्नानि । द्विरागमनम् ॥

Previous notice —C. C Pt. I. 617(?)

No. 358 व्यवहाररत्नम् by भानुनाथ ॥ Vyavahāraratnam.

Substance :—Character, Maithilī. White paper. Lines, 11 on a page. Letters, 62 in a line Folia, 17. $13\frac{1}{2} \times 4\frac{1}{2}$ inches. Appearance, tolerable. Verse. Complete. Incorrect. Date ? Place of deposit, Pandit Balabhadra Jhā, Pacharhi, P. O. Pandaul, Darbhanga A hand-book of Jyotiṣ-Śāstra dealing with the calculation of days in yātra etc, by Bhānunātha of Pilakhwar in the Sub-Division of Madhubani in the district of Darbhanga.

Beginning :— ओं नमो भगवते वासुदेवाय ॥
नत्वा मुकुन्दस्य पदारविन्दं
स्वर्गापवर्गद्रुमराजकन्दम् ।
श्रीभानुनाथः कृतचारुयत्नं
करोम्यहं सद्व्यवहाररत्नम् ॥ १ ॥

स्वकृतपरकृताभ्यां संग्रहोयं मदीयः
सुललितपदरम्य सर्वलोकाभिगम्य ।
निखिलवरकुलानां मैथिलानामिदानीं
जनयति परितोषं त्यक्तनिःशेषदोषं ॥ २ ॥
काव्यं श्रीभानुनाथस्य प्राचीनगणकस्य च ।
माधुर्यमनयोर्ज्ञेयं शर्कराक्षीरयोरिव ॥ ३ ॥
दुर्जनैरपि क्षन्तव्यमपराधद्वयं मम ।
सज्जनानां विनोदाय यतो ग्रन्थं करोम्यहम् ॥ ४ ॥
विनोपदेशं खलु बालकानां
चेतोविशुद्धिर्न विधानपूर्वा ।
यतस्ततः प्रागुपदेशमेव
क्रमेण वक्ष्यामि हितञ्च तेषाम् ॥ ५ ॥

End.— नाधीतं शब्दशास्त्रं नवरसरुचिरं काव्यवर्गादिकं वा
कोषो वालंकृतिर्वा स्मृतिरपि सकला तन्त्रविद्यापि नैव ।
वाणीमात्रप्रसादादविकलमनसा शास्त्रसारं निरुक्तं
प्रध्वंसस्तत्र यद्यत्खलजनकुधिया सज्जनैः क्षम्यतां तत् ॥ १३० ॥

Colophon :— इति खौआलकुलानन्दवन्दनानन्दनोपाध्यायसुतश्रीभानुनाथदैवज्ञविरचिते-गृहागमनादिप्रकरणं संपूर्णम् ॥ ० ॥ ० ॥ ० ॥ ० ॥ श्रीरस्तु । शुभमस्तु ॥ ० ॥ ० ॥

विषयः । व्यवहारोपयोगिविषयाणां यात्राव्रतबन्धविवाहादीनां विचारः ॥

Previous notice :—C. C. Pt. I. P. 617.

No. 359. **व्यवहाररत्नावली** ॥ Vyavahāraratnāvalī .

Substance :—Character, Maithilī. White paper. Lines, 13 on a page. Letters, 58 in a line. Folia, 3. $15 \times 5\frac{3}{4}$ inches. Appearance, tolerable. Prose and verse. Incomplete. Generally correct. Date ? Place of deposit, Raj Library, Darbhanga. A manual of Jyotiṣ-Śāstra dealing with śuddhivichāra and vivāha-vichāra. Anonymous.

Beginning.— अथ कृत्यप्रसङ्गेन कालशुद्धसमयकृत्यानीति समयाशुद्धिप्रकरणमुच्यते । शुद्धत्वञ्च समयस्य मल्लिम्लुचगुरुशुक्रबाल्यवार्धकास्तमयसिंहमकरान्यत-

रगुरुस्थितिपूर्वराश्यनागतातीचारिगुरुसम्वत्सरपूर्वराशिसंक्रमिष्यमाणानी-
चारिगुरुपक्षत्रयवक्रिगुरुकाष्ठाविंशतिवासरकेत्वाद्यङ्गु ततदुत्तरसप्ताहादिसिं-
हादित्यगुर्वादित्यपौषादिमासचतुष्टयान्यतमैकद्वित्रिदिनवृष्ट्या तदुत्तरैकत्रि-
सप्ताग्न्यतमदिनानि निषिद्धसमयान्यत्वमेव निरुक्तम् ॥

End.— यथाक्रमेणैव लग्नभोगः सूर्यभुज्यमानं लग्नं प्रातःसंध्यायां सप्तम्योदयः यावत्सूर्यो भुज्यमानभुक्तं तावत्तत्रापि भुक्तमिति ॥ * ॥

Colophon.— इति व्यवहाररत्नावल्यां विवाहादिशुभाशुभप्रकारः संपूर्णः ॥ ॥ ॥
यावत्पश्यसि पन्थानं यावत्ते चरणौ हृदि ।
यावन्न हीयसे बुध्या तावदात्महितं कुरु ॥

विषयः । शुद्धिविचारो वैवाहिकविचारश्च ॥

Previous Notice :—C. C. Pt. III. P. 129 (?).

No. 360. शकुनाध्यायः by गौतम ॥ Śakunādhyāyaḥ.

Substance:—Character Maithilī. White paper. Lines, 17 on a page. Letters, 48 in a line. Folia, 2. $12 \times 4\frac{1}{2}$ inches. Appearance, tolerable. Verse. Complete. Generally Correct. Date ? Place of deposit, Devakṛṣna Jhā, Chanaur, P. O. Manigachi, Darbhanga. A hand-book of Jyotiṣ-Śāstra dealing with Phalabhāga by Gautama.

Beginning:— श्रीगणेशाय नमः ॥
अकारे मानमैश्वर्य्यमर्थलाभश्च सम्पदः ।
सर्वं प्राप्नोति संपूर्णमकारेण विनिर्दिशेत् ॥ १ ॥
आकारे बहुसन्तापो भवकाले क्रमेण च
सर्वस्वजनितं कष्टं आकारेण विनिर्दिशेत् ॥ २ ॥

End:— हकारे गुह्यनाशश्च दृष्टिनाशश्च जायते ।
अध्वानुसुखमवाप्नोति हकारेण विनिर्दिशेत् ॥ ४९ ॥
क्षकारे क्षेममारोग्यं धनलाभश्च निश्चितम् ।
कल्याणं विजयं चैव क्षकारेण विनिर्दिशेत् ॥ ५० ॥

Colophon :— इति गौतमविरचितं शकुनाध्यायः संपूर्णः ॥ ओं नमो गणेशाय ॥ ओं नमस्तस्यै ३ श्रीविश्वेश्वरो जयतितराम् । ओं नमस्तस्यै ॥

विषयः । कोष्ठान्तर्गतपञ्चाशल्लिपिभिः प्रश्नानां शुभाशुभनिरूपणम् ॥

No. 361. शंभुहोराप्रकाशः by पुञ्जराज ॥ Śambhuhorāprakāśaḥ.

Substance :—Character, Devanāgarī. White paper. Lines, 10 on a page. Letters, 40 in a line. Folia, 58. 11 × 4½ inches. Appearance, tolerable. Verse. Incomplete Incorrect. Date ? Place of deposit, Pandit Rāmachandra Jhā, Mahinathpur, P. O. Deodha, Darbhanga. A treatise on Jyotiś-Śāstra dealing with Phalabhāga by Puñjarāja. Worn out. Last folia are in damaged condition.

Beginning :— श्रीगणेशाय नमः ॥

सानन्दं परमं शिवं सगिरिजं भक्ताभिलाखप्रदं
गीर्वाणार्चितपादपद्मयुगलं श्रीरेणुकासिद्धिदं
सिन्दूरोल्लसितं गजेन्द्रवदनं मार्तण्डमुख्यग्रहा-
न्वन्देहं गरुडध्वजं च शिरसा श्रीमाधवाख्यं गुरुम् ॥ १ ॥
ब्रह्म सूर्यसमुद्भवं शिवशिवासंवादजं होरिकं
श्रीमद्गर्गवशिष्ठशौनकशुकव्यासादिभिः कीर्तितम् ।
शास्त्रं सत्यवराहरेणुकमणित्थाद्यैश्च यद्विस्तृतं
तत्सारं परिगृह्य कोमलपदैः श्रीमच्छिवानुज्ञया ॥ २ ॥
शिवमुखैर्गदितं च निजागमैर्भगणजं गगने चरजं फलं ।
ललितनिर्मलकोमलसत्पदैः सुमतिना कृतिना हि विरच्यते ॥ ३ ॥
विद्वद्गम्यं खेटलीलाविलासि होराचार्य्यः पुंजराजः करोति
होरासारं शंभुहोराप्रकाशं रम्यैर्वृत्तैः शंभुभूपालतुष्ट्यै ॥ ४ ॥

End of Ms. :— तत्र रवेर्योगपिण्डः १६८ सप्तभिः ७ गुणितः ११७६ सप्तविंशतिभक्ते २७ लब्धं वर्षगति ४३ शेषं १५ द्वादश १२ गुणितं १८० सप्तविंशतिभक्ते लब्धमासा ६ शेषं १८ त्रिंशद्ध ३० णितं ५४० सप्तविंशतिभक्ते २७ लब्धदिवसाः २० शेषंषष्टिगुणसप्तविंशतिभक्ते लब्धं घटिकाफलानि एवं जातो रवेर्मध्यमायु ५४३।६।२०।०।० वर्षादि एवं चन्द्रादिनामायुः साध्यः ।

सप्तविंशतिवर्षाणि मण्डलं परिकीर्त्तितं २७ ।
तदूर्ध्वं भूमि ९४ भिः शोध्यं.....

Colophon — Wanting.

विषयः । जन्मपत्रीविचारः । ग्रहाणां शुभाशुभफलादेशः । आयुर्दायविचारः ॥

Previous Notice :— C. C. Pt. I. P. 637. Pt. II. P. 151, 228.

No. 362. **शरच्चन्द्रोदयः** by **चिरञ्जीव मिश्र** ॥ Śarachchandrodayaḥ

